# सस्कृत वार्ता

**दिनाङ्क: - 28.11.2024** **सायम् - 06:20**

**मुख्यवार्ताः**

- भारतदेश: बांग्लादेशे अल्पसंख्य-समुदाये, हिन्दु समुदाये च सञ्जातेषु हिंस्र-प्रकरणेषु गंभीरो वर्तते, प्रोक्तव्य यत् तत्रत्य प्रशासनं एतदर्थं पूर्णरूपेण उत्तरदायि-वर्तते।
- संसद: द्वयो: सदनयो: कार्यजातं विभिन्न् प्रकरणेषु, विपक्षीय- व्यवधानकारणाच्च चतुर्थे दिवसेऽपि स्थगितम् ।
- गृहमन्त्रिणा अमित शाहेन भुवनेश्वरे अद्य आरक्षि महानिदेशकानां- महानिरीक्षकाणां च त्रि-दिवसीय- अखिल-भारतीय- सम्मेलनं उद्घाटितम् । प्रधानमन्त्री श्व: भागं निर्वक्ष्यति।
- सैयद-मोदी-अन्ताराष्ट्रिय-बैडमिण्टन-प्रतिस्पर्धायां महिला-एकल-प्रागुपान्त्यचक्रे पी.वी. सिंधु: प्रतिष्ठा ।

**अथ वार्ताः विस्तरेण**

**विदेश-मन्त्रालय-बांग्लादेश:**

भारतीय-प्रशासनेन भणितं यत् बांग्लादेशे अल्पसंख्यकान् विरूद्धय हिंस्र-घटना-संबद्ध-स्थिति: दृष्टिपथे वर्तते इति। तत्र हिन्दु-समुदाये हिंस्र घटना: घटिता: । वार्ताहरा: सम्बोधयन् विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जायसवाल: भणितवान् यत् तत्रत्य प्रशासनं अल्पसंख्यकान् समेत्य सर्वेषां नागरिकाणां जीवन-सुरक्षा-स्वतन्त्रतायै च पूर्ण-उत्तरदायि वर्तते।

**लोकसभा जयशंकर**

विदेश मन्त्रिणा सुब्रह्मण्यम जयशंकरेण प्रोक्तं यत् प्रशासनेन बांग्लादेशे हिन्दु-समुदायं विरूद्धसंजाता: हिंस्र-घटना: गंभीर रूपेण मनसि निधाय कार्याचरितम् । तेनोक्तं यत् बांग्लादेशे वर्षेऽस्मिन् अगस्तमासे अल्प संख्यकानां जनानां गृहाणि, व्यावसायिक-प्रतिष्ठानानि च क्षतिग्रस्तानि जातानि । मन्दिरेषु, पूजास्थलेषु आक्रमणानि जातानि। एतादृशानि घटनानि समालोक्य प्रशासनं, चिन्तितं वर्तते । श्री जयशंकरेण प्रोक्तं यत् प्रशासनं ढ़ाकायां भारतीय-उच्चायोगे स्वकीय-दृष्टिं संधारयाति।

**बांग्लादेश-इस्कान**

बांग्लादेशीय-प्रशासनेन प्रतिपादितं यत् देशे इस्कॉन सम्बद्ध-प्रकरणेषु, तं प्रति प्रतिबन्ध-विषये च कोऽपि विचार-विमर्श: नैव जात: । अन्तरिम-प्रशासने पर्यावरण-वन- ऋतु परिवर्तन-सम्बद्ध-परामर्शदात्रा सैय्यद-रिजवान हसनेन गुरूवासरे ढ़ाकायां सूचनेयं प्रदत्ता। इत: प्राक् गुरूवासरे बांग्लादेशीय उच्च-न्यायालयेन इस्कॉन सम्बद्ध-याचिकायां प्रतिबन्धं स्थापयितुं याचिका निराकृता। न्यायालयेन प्रशासनस्य प्रक्रियायां संतुष्टि: अभिव्यक्ता सम्पत्ति-सुरक्षां विषये च दिंगनिर्देशा: सम्प्रसारिता: तदननन्तरं बांग्लादेशस्य महासचिवेन चारू-चन्द्रदास-ब्रह्मचार्येण ढ़ाकायां वार्ताहरा: सूचिता: यत् चिनमन्य-कृष्णादास-ब्रह्मचारी अस्मदीय संघटनस्य नास्ति। यतोहि संघटनेन तं निष्कासितम् ।

**संसद-स्थगनम्**

संसद: सदनद्वयमद्य शीतकालीन-सत्रस्य चतुर्थे दिवसेऽपि व्यवधान-पुरस्सरं स्थगितम् जातम्। प्रमुख-व्यापारिक-समूहं विरूद्धय कथित-प्रवञ्चना-आरोपान् समेत्य विभिन्न-प्रकरणेषु राज्यसभा-लोकसभा उभयो: सदनयो: कार्यजातं दिवसात्मकं यावत् स्थिगितम् । लोकसभाया: पुन: कार्यं यदा प्रारब्धं, कांग्रेस, डी एम के, समाजवादी, विपिक्ष-दलीय सदस्यै: तुमुलकोलाहलं कृतवन्त:। प्रश्नकालमपि, अध्यक्षस्य ओम-बिरलाया: अपील-अनन्तरमपि प्रचलितम् ।

**बाइट- ओम बिरला**

अत्यधिक-व्यवधान-कारणात अध्यक्षेण सदनस्य कार्यजातं दिवसात्मकं यावत् स्थगितम्। राज्यसभायां यदा प्रात: सदनस्य उपवेशनं प्रारब्धं तदा सभापतिना जगदीप धनखड़ेन विपक्षस्य स्थगन- प्रस्ताव: निरस्ती कृत: तेनोक्तं जना: व्यवहारेऽस्मिन् दु:खिता: सन्ति।

**बाइट-धनखड़**

तेन भणितं यावत् तुमुल-कोलाहल-मध्ये सभापतिना-सदस्य कार्यं दिवसात्मकं स्थगितम् ।

**संसद-विपक्ष-प्रदर्शनम्**

आम-आदमी-पार्टीति दलीय सांसदै: दिल्ल्यां आपराधिक-घटनासु वृद्धे: आरोपं विधाय संसद: बहि: प्रदर्शनं विहितम् । पार्टी नेता संजय सिंह: वार्ताहरान् प्रौक्तवान् यत् केन्द्र प्रशासनं राजधान्यां अपराधं रोद्धुं उपाया: विदधाति । अपरत्र पञ्जाब-राज्यस्य कांग्रेस सांसदै: संसद-परिसरि प्रदर्शनं विहित् । तेनारोपितं यावत् भारतीय-खाद्य-निगम न्यूनतम्-समर्थन-मूल्येषु शस्यानि नैव बिक्रणात्। अत्र सांसदेन-पञ्जाब-कांग्रेस-प्रमुखेता अमरिन्दर-सिंहेन आरोपितं यावत् पञ्जाब-प्रान्तीय कृषकैस्याकं अन्यायं जायते।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**अमित शाह:**

केन्द्रीय गृहमन्त्रिणा अमित-शाहेन भुबनेश्वरे-ओडिशायं अद्य आरक्षि-महानिदेशकानां, महानिरीक्षकानां च अखिल-भारतीय-सम्मेलनं समुद्घाटितम् । त्रि-दिवसात्मिकीये सम्मेलनेऽस्मिन् आन्तरिक-सुरक्षा-साइबर-अपराध- माओवादी- आक्रमण कृत्रिम – समुत्थापित – विषयेषु चर्चा सम्भाव्यते । आतंकवादं सम्मुखी कर्तुम् अपि विचार-विमर्शो भविष्यति । अस्मदीय वार्ताहरेण ।

विज्ञापितं यत् अवसरेऽस्मिन् विशिष्ट-सेवायै राष्ट्रपति-आरक्षि-पदकानि अपि प्रदास्यन्ते । प्रधानमन्त्री नरेन्द्रमोदी सम्मेलने अस्मिन् श्व: भागं भजिष्यति । एतदतिरिच्य राष्ट्रिय-सुरक्षा- परामर्शद:- अजीत- डोभाल: अपि उपवेशने स्वभूमिकां प्रस्तोष्यति।

**सिंधिया-अष्टलक्ष्मी महोत्सव:**

उत्तर पश्चिमीय क्षेत्राणां विकास मन्त्रिणा, ज्योतिरादित्य सिंधिया वर्येण भणितं यावत् आगामि अष्टलक्ष्मी-महोत्सव: उत्तर-पश्चिम-क्षेत्राणां रिक्तस्थानं प्रपूरयति । हर्षोल्लासेन पूरितमिदं जनानां मध्ये भूरि-प्रसन्नता जागृत: तेन भणित यावत माता लक्ष्मी, सुख- समृद्धि- पारस्परिक-सौहार्द-ज्ञान-धर्म- साहस-बहुषु अर्थेषु पूजयति।

**यूजीसी-उपाधि**

विश्वविद्यालय अनुदान आयोगः (UGC) शीघ्रमेव स्नातकोत्तरछात्राणां कृते उपाधिपाठ्यक्रमस्य अवधिं न्यूनीकर्तुं विस्तारयितुं वा विकल्पं प्रदास्यति। यूजीसी इत्यनेन त्वरिता उपाधिकार्यक्रमस्य विस्तारित उपाधिकार्यक्रमस्य च मानकसञ्चालनप्रक्रियाः अनुमोदिताः । यूजीसी- इत्यस्य अध्यक्षः एम जगदीशकुमारः वार्तावाहिनीनां माध्यमेन अवदत् यत् त्वरितोपाधि-कार्यक्रमेण छात्राः प्रति-सत्रं अतिरिक्त-क्रेडिट्- इति अर्जयित्वा अल्पावधौ त्रिवर्षीयां चतुर्वर्षीयां वा उपाधिं सम्पन्नां कर्तुं शक्नुवन्ति। विस्तारितः उपाधिकार्यक्रमः प्रतिसत्रं न्यूनानि क्रेडिट्-सहितं विस्तारितां समयरेखां सक्षमं पुष्टिं च करिष्यति।

**प्रधानमन्त्री-पर्यटनम्**

अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सबलं प्रतिपादितं यत् पर्यटनस्य पार्श्वे नैकेषां जनानां जीवने समृद्धिम् आनेतुं सामर्थ्यं वर्तते। प्रतिष्ठितपर्यटनकेन्द्राणां विकासाय चत्वारिंशत् परियोजनानां अनुमोदनस्य घोषणा कुर्वता पर्यटनमन्त्रिणः गजेन्द्रसिंहशेखावतस्य सामाजिक सञ्जालीयः सन्देशं पुनः प्रसारयन्ता श्रीमोदीना उक्तम् यत् भारतस्य पर्यटनस्य आधारभूतसंरचनायाः संवर्धनाय सर्वकारः निरन्तरं ध्यानं दास्यति। सः अवदत् यत् एतेन प्रयासेन अधिकाः जनाः अतुल्यभारतस्य आश्चर्यं अनुभवितुं शक्नुवन्ति इति सुनिश्चितं भविष्यति।

**सर्वोच्चन्यायालयः-संभलविचारः**

सर्वोच्चन्यायालयेन अद्य उत्तरप्रदेशस्य सम्भलस्थ-शाही-जामा-मस्जिद-समित्याः मस्जिद-सर्वक्षण-प्रकरणस्य विषये उच्चन्यायालये गन्तुं निर्दिष्टम्। भारतस्य मुख्यन्यायाधीशस्य संजीवखन्ना वर्यस्य, न्यायाधीशस्य संजयकुमारस्य च पीठः सम्भल-मस्जिद-सर्वेक्षणस्य अनुमतिं प्रदत्तस्य सम्भल-विचारन्यायालयस्य आदेशस्य वाद-श्रवणं कुर्वन् आसीत्। सर्वोच्चन्यायालयेन निम्न न्यायालयाय निर्देशः दत्तः यत् यावत् सर्वेक्षण-आदेशस्य विरुद्धं मस्जिद-समित्या पंजीकृत याचिका इलाहाबाद-उच्चन्यायालये सूचीकृता न भवेत तावत् प्रकरणं अग्रे न वर्धेत् इति। न्यायालयेन इदमपि निर्दिष्टं यत् मस्जिदस्य सर्वेक्षणं कुर्वन्तौ अधिवक्ता आयुक्तौ च प्रतिवेदनं एकस्मिन् सुरक्षित आवरणे स्थापयन्तु इति। अस्मिन् मासे ऊनविंशति दिनाङ्के स्वस्य आदेशे विचारण न्यायालयेन एकस्मिन् प्रकरणे अधिवक्ता आयुक्तं च मस्जिदस्य सर्वेक्षणं कर्तुं निर्देशः दत्तः, यस्मिन् उल्लिखितम् आसीत् यत् मस्जिदं मन्दिरस्य विनष्टानन्तरं निर्मितम् इति।

**पी. वी. सिंधुः**

लखनऊ नगरे पी.वी. सिंधुः, सैय्यद-मोदी अन्ताराष्ट्रिय-बैडमिण्टन-प्रति स्पर्धायां महिला-एकल प्रति योगितायां प्रागुपान्त्यचकं प्रविष्टे । पुरूष-एकल-प्रागुपान्त्यचक्रे लक्ष्य-सेनः, भारतीय- क्रीडकः मीराबा-लुवांगं सम्मुखी- करिष्यति ।

**॥इति वार्ताः॥**